५५६२



No. १०९६ क

Title श्री ललितापद्धतिः

Author

Extent २२ पत्र Age

Subject तन्त्र

मंत्रशास्त्रआह्निक

ललितापद्धती

नं० १०९६

174

नं. १०८६ क
श्री ललितापद्धति:
२२ पत्राणि

# 5562

F 22

Complete

अ- १

ॐ श्रीगणेशाय नमः अथ मंत्रशास्त्राह्निक
ग्रंथ लिख्यते सर्वश्रीक्रममंत्रेषु त्रितारीयोज
नं पुनः ऐं ह्रीं श्रीमित्यात्मिकायास्तास्मृतं पूर्वकेषु
च १ श्रीमान्नोक्तगुणोल्लव्यादीनामुक्तगुणान्वितः
इष्टा महागणपतिमारभेत श्रीयक्रमं २ सुहूर्तेवा
ह्म्यउत्थायनिषण्णः शायनेनिजे अपलापायपा
पानामादावेवं समाचरेत् ३ स्वब्रह्मरंध्रगांभोज
कर्णिकापीठवासिनं शिवरूपं श्वेतवस्त्रमाल्यभू
षानुलेपनम् ४ दयार्द्रदृष्टिं स्मेरास्यं वराभयकं
भुजम् वामांकगतयापीनवक्षोजफलविभ्रया ५
पद्मवद्वामकरे शक्त्यादत्तभुजाहृतं गौरं श्रीमा
न्स्वनाथं स्वानंदं चिंतयेत्सुधीः ६ ततः ऐं ह्रीं श्रीं ह
स्क्ष्फ्रें हसक्षमलवरयूं सहक्षमलवरयीं हसौं स
हौः अमुकाम्बासहित अमुकानंदनाथगुरुश्री
पादुकां पूजयामि नम इति मंत्रांते सम्मुख स्वहस्त
चतुरस्र मुद्गरमुद्रायोन्याख्याभिः पंचभिर्मुद्रा
भिः तं प्रणमेत् ततः नमस्तेनाथभगवन् शिवाय
गुरुरूपिणे विद्यावतारसंसिध्यै स्वीकृतानेकविग्र
ह १ नवायनवरूपाय परमार्थस्वरूपिणे सर्वाज्ञा
नतमोभेद भानवे चिद्घनायते २ स्वतंत्राय दया
क्लृप्तविग्रहाय शिवात्मने परतंत्राय भक्तानां भ
व्यानां भव्यरूपिणे ३ विवेकिनां विवेकाय विम
र्शाय विमर्शिनां प्रकाशानां प्रकाशाय ज्ञानिनां ज्ञा
नरूपिणे ४ पुरस्तात्पार्श्वयोः पृष्ठे नमस्कुर्यामुपर्य

यः सदाम च्चितरूपेण विधेह्मिभवदासनम् ५
इत्येवं पंचभिः श्लोकैः स्तुवीत यतमानसः प्रातः
प्रबोधसमये जपात् स्तुदिवसं भवेत् ६ अथत
च्चरणकमलयुगलविगलदमृतरसविसरप
रिप्लुतांगं भावयन्नात्मानं शिवादि श्रीगुरुभ्यो न
म इति मूर्धेति बद्धांजलिस्त्रिः प्राणनायच्छेत्
तत्प्रकारश्च एकवारमावृत्तया मूलविद्यया पिं
गलापथेन पूरकं त्रिरावृत्तया मूलाधारानाहता
ज्ञासंज्ञेषु क्रमेण शोणपीतश्वेतकूटत्रयविभाव
न पूर्वं सुषुम्णायां कुंभकं सकृदावृत्तया च तया
इडानाडीवर्त्मना रेचकमिति इह पूरकरेच
कयोः पिंगलेडयोर्व्यत्ययोपि दृष्टोन्यत्रैतेन
च नियमितपवनमनःस्पंद आमूलाधारमा
च ब्रह्मबिलमुद्गतां तडिल्लतासदृशाकृतिं त
रुणपिंजर तेजसंज्वलंतीं सर्वकारणभूतां
परां संविदं विचिंत्य तद्रश्मिनिकरभस्मिते
सकलकश्मलजाला मूलं मनसा दशवार
आवर्त्यवक्ष्यमाणान् रश्मिमालामंत्रांश्चैकवा
रमावर्तयेत् रश्मिसूत्रगावर्तनं तत्रैव र्णिकविष
ये नेचयथा तत्र वैदिकेषु स्वरपूर्वपाठः ॐ भू
र्भुवः स्वस्तत्सवितुर्वरेण्यं भर्गो देवस्य धीम
हि धियो यो नः प्रचोदयात् इति त्रिंशदर्णा गा
यत्री ॐ यत इंद्र भयामहे ततो नो अभयं कृधि
मघवन् छग्धि तव तन्न ऊतये विद्विषो विमृ

सू॰
२
2

धीजहि स्वस्तिदा विशांपतिर्वृत्रहा विमृधो व
शी वृषेन्द्रः पुर एतु नः स्वस्तिदा अभयंकरः २
इत्यैन्द्री विद्या सप्तम्बष्टाक्षरी संकटे भयनाशि
नी ॐ घृणिः सूर्य आदित्योम् ३ इत्यष्टाक्षरी सौरी
तेजोदा ॐ ४ इति प्रणवः केवलो ब्रह्मविद्या
मुक्तिदा ॐ परो रजसे सावदोम् ५ इति नवाक्ष
तुर्य गायत्री स्वैक्य विमर्शिनी रश्मिपंचक
मेतत् मूलाधारे हृ ज्वाल विधि र्विलद्वाद
शांतस्थाने वीजतया भावनीयम् द्वादशांत
स्थानं तु ललाटस्योत्तरभागः ॐ सूर्याद्युतिते
जसे नमः खेचराय नमः असतो मा सद्गमय
तमसो मा ज्योतिर्गमय मृत्योर्मामृतं गमय
उष्णो भगवान् शुचिरूपः हंसो भगवान् शुचि
रप्रतिरूपः विश्वरूपं घृणिनं जातवेदसं हिर
ण्मयं ज्योतिरेकं तपंतम् सहस्ररश्मिः शतधा व
र्तमानः प्राणः प्रजानामुदयत्येष सूर्यः ॐ नमो
भगवते सूर्याया हो वाहिनी वा हिण्य हो वाहि
नि वाहि नि स्वाहा वयः सुपर्णा उपसेदुरिन्द्रं प्रि
यमेधा ऋषयो नाधमानाः अपध्वांतमूर्णुहि
पूर्धि चक्षुर्मुमुग्ध्यस्मान्निधयेव वद्धान् पुंडरी
काक्षाय नमः पुष्करेक्षणाय नमः अमलेक्षणा
य नमः कमलेक्षणाय नमः विश्वरूपाय न
मः श्रीमहाविष्णवे नमः इति षोडश मंत्रस
मष्टिरूपिणी हृदष्टि सिद्धिप्रदा चक्षुष्मती वि

या १ ॐ गंधर्वराजविश्वावसो ममाभिलषितां
कन्यां प्रयच्छ स्वाहा इत्युत्तमकन्याविवाहदायि
नी २ ॐ नमो रुद्राय पथिषदे स्वस्ति मां संपारय इ
ति मार्गसंकटहारिणी ३ ॐ तारे तुत्तारे तुरे स्वाहा
इति जलापच्छमनी ४ ॐ अच्युताय नमो ऽनंताय न
मो गोविंदाय नमः इति महाव्याधिशमनी नाम
त्रयी विद्या ५ एतद्दर्शिमपंचकं मूलाधारादिप
द्मकरत पाठ्येयं ॐ श्रीं ह्रीं क्लीं ग्लौं गं गणपतये व
रद सर्वजनं मे वशमानय स्वाहा इति महागण
पति विद्या प्रत्यूहशमनी ॐ नमः शिवायै ॐ न
मः शिवाय इति द्वादशार्णा शिवतत्वविमर्शि
नी ॐ जूं सः मां पालय पालय इति दशार्णा मृत्यो
रपि मृत्युरेषा विद्या ॐ नमो ब्रह्मणे धारणं मे अ
स्त्वनिराकरणं धारयिता भूयासं कर्णयोः श्रुतं मा
च्योढ्वं ममामुष्य ॐ ४ इति श्रुतधारिणी अं तं ५
इति सबिंदुमातृका अकारादि क्षकारांत वर्णात्मि
का मातृका सर्वज्ञताकरी पंचेमा रश्मयो मूलादि
रन्ध्रात्मकतया द्रष्टव्याः हसकलह्रीं हसकहल
ह्रीं सकलह्रीं इति हादिविद्या स्वस्वरूपविमर्शि
नी १ क्लीं ह्रैं स्त्रौः स्त्रौः ह्रैं क्लीं इति षट्कूटा सं
पत्करी विद्या २ संसृष्टिनिरूपि स्वाहा हंस्थितिपू
र्णे नमः रं महासंहारिणि कृशे चंडकालि फट्
३ रंहृत्वक्रिमहानाख्ये अनंतभास्करि महाचंडका
लि फट् पुनश्चैता विद्याः प्रातिलोम्येन पठित्वा त

तो ह्सखफ्रें महाचण्डयोगेश्वरी इति पठेत् इति वि
द्यापञ्चकरूपिणी कालसंकर्षणी परमार्थप्रदा
३ ऐं ह्रीं श्रीं ह्स्ख्फ्रें ह्सौः अहं अहं अहं अहं ह्सौः
ह्स्ख्फ्रें श्रीं ह्रीं ऐं इति चतुर्दशार्णा शुद्धज्ञानदा शा
म्भवी ४ सौः इयं परा विद्या ५ एताः पञ्चरश्मयो मू
लाद्यधिष्ठानतया कलनीयाः ऐं क्लीं सौः सौः क्लीं
ऐं ऐं क्लीं सौः इति नवार्णा श्रीयोगबाला १ ह्रीं श्रीं क्लीं
ओं नमो भगवत्यन्नपूर्णे ममाभिलषितमन्नं देहि
स्वाहा इति श्रीयन्त्रपागमन्नपूर्णा २ ओं आं ह्रीं क्रों
एहि परमेश्वरि स्वाहा इति श्रियः प्रत्यंगमश्वा
रूढा ३ श्रीविद्यागुरुपादुकामन्त्रस्तान्त्रिकप्रक
रणे एवोक्तः द्रष्टव्यः पठितव्यः ४ अथ मूलविद्या सा
च गुरुमुखादवगता कादिनाम्नी वलात्रपूर्णाश्वारू
ढा श्रीपादुकाश्चेत्येताभिश्चतसृभिर्युक्ता मूलवि
द्या सा शाक्ती मूलाधारे विलोचनीया ५ ऐं नम उच्छिष्ट
चाण्डालि मातङ्गि सर्ववशंकरि स्वाहा १ इति श्यामाया
अङ्गलघुश्यामा ऐं क्लीं सौः वद वद वाग्वादिनि स्वा
हा इति श्यामोपाङ्गं वाग्वादिनि ओं आं ह्रीं पिधाना
नकुली दन्तैः परिवृता पविः सर्वस्यैवाचईशाना
चारुमामिह वादयेत् इति श्यामाप्रत्यंगं नकुली
२ श्रीविद्यागुरुपादुकैव प्रथमबीजत्रयस्थाने वा
ला सहिता श्यामा गुरुपादुका भवति ४ ऐं ह्रीं श्रीं
ऐं क्लीं सौः ओं नमो भगवति श्रीमातङ्गीश्वरि सर्व
जनमनोहरि सर्वमुखरंजिनि क्लीं ह्रीं श्रीं ह्रीं श्रीं स

र्वराजवशंकरिसर्वस्त्रीपुरुषवशंकरिसर्वदुष्ट
मृगवशंकरिसर्वसत्ववशंकरि सर्वलोकवशं
करि राजानंमेवशमानयस्वाहासौः क्लींऐंश्रींह्रीं
ऐंद्रांत्यष्टनवतिवर्णाराजश्यामला ५ अंगोपां
गप्रत्यंगपादुकेत्याभिश्चतसृभिर्युक्ता लघुके
श्यामलायष्टव्या ल्रंवाराहि ल्रंउन्मत्तभैरवि पा
दुकाभ्यांनमः इतिमहावाराह्यंगलघुवाराहि
१ ॐह्रींनमोवाराहिघोरेस्वप्नंठःठःस्वाहा इयंत
दुपांगस्वप्नवाराही २ ॐऐंनमोभगवतिमहा
मायेपशुजनमनश्चक्षुस्तिरस्करणंकुरुकुरुहुं
फट्स्वाहा इयंतत्प्रत्यंगतिरस्करणी ३ श्यामा
पादुकादिवीजत्रयस्थाने ऐंग्लौं इतिवीजद्वय
योगेवाराहीगुरुपादुकाभवति ४ ऐंग्लौंऐंन
मोभगवतिवार्तालि २ वाराहि २ वराहमुखि २
अंधेअंधिनि नमोरुंधेरुंधिनिनमोजंभेजंभिनि
नमोमोहेमोहिनि नमस्तंभे स्तंभिनिनमः सर्व
दुष्टप्रदुष्टानां सर्वेषांसर्ववाक्चित्तचक्षुर्मुखगति
जिह्वास्तंभनंकुरु २ शीघ्रंवश्यं ऐंग्लौं ठःठःठः
ठः हुंअस्त्रायफट् ५ इतिद्वादशोत्तरशताक्षरोम
हावाराहीमंत्रः एताभिश्चतसृभिःसहितामहावा
राहीयमाज्ञाचक्रेपरिपूज्या प्रथमद्वितीयकूटयो
र्हृल्लेखावर्जंपंचदशपेवत्रयोदशाक्षरी श्रीमूर्तिवि
द्यावल्लरीध्येयष्टव्या प्रथमत्रिकस्थानेत्रिनारीकुमारी

श्रीं.ष

५

वाग्भेलामित्यष्टबीजपूर्वाश्रीगुरुपादुकैवमहापा
दुकासर्वमंत्रसमष्टिरूपिणी स्वैक्यविमर्शिनि
महासिद्धिदायिनीद्वादशांतेवरिवस्या आहृतपर
शिममालामंत्राः सप्तविंशत् २७ एतेब्राह्ममुहूर्त
सकृदावर्तनीया इत्युक्तमेवप्राक् श्रीक्रमोक्ताः सर्व
एतेऽन्येचमंत्राः साधकेषुप्रेम्णापरमयाप्रकीर्त्य
लिखिता अन्येचश्रीगुरुमुखादवगम्यैवपठितामं
हितेश्रेयसे नान्यथेतिशिवशासनं पुस्तकेलिखि
तान् मंत्रानवलोक्यजपेत्तुयः सजीवन्नेवचांडालो
मृतःश्वानोभविष्यति इतिसांख्यायनतंत्रवचनात्
अथाधरणीतलन्यस्तवहन्नाडीपार्श्वपदमुत्थाय
ग्रामाद्बहिः स्मार्तेनविधिनानिर्वर्तितशौचक्रियः
आयुर्बलंयशोवर्चः प्रजाः पशुवसूनिव ब्रह्मप्रज्ञा
चमेधांचत्वंनोदेहिवनस्पते इतिमंत्रेणदंतकाष्ठ
मभिमंत्र्य ३ क्लींकामदेवायसर्वजनप्रियायनमः
इतिमंत्रेणदंतधावनं ह्यल्लेखयाजिह्वोल्लेखनं
चविधाय कफविमोचनना साशोधनहृषिकानि
रसनपूर्वंविहितविंशतिगंडूषः ३ श्री १३ ऐंश्रीं
ह्रींश्रीकमलेकमलालयेप्रसीद २ श्रींह्रींश्रींऐं
महालक्ष्म्यैनमः २३ श्रीं ह्रीं क्लीं २१ श्रींसहक
लह्रींश्रीं ४ इतिमंत्रचतुष्टयेनमुखविशुद्धये य
थास्तत्याचमेत् ततनद्यादौवैदिकस्नानोत्तरं
श्रीललिताप्रीत्यर्थंतांत्रिकस्नानंकरिष्येजलेषुर

तोहस्तमात्रेचतुरस्रमंडलंपरिगृह्य ब्रह्मांडो
दरतीर्थानिकरैःस्पृष्टानितेरवे तेनसत्येनमे
देवतीर्थंदेहिदिवाकर इतिसूर्यमभ्यर्थ्य आ
वाहयामितांदेवित्स्नानार्थमिहसुंदरि एहिगं
गेनमस्तुभ्यंसर्वतीर्थसमन्विते इतिमंत्रेणगं
गामभ्यर्थयित्वा क्रांक्रींक्रैंक्रौंक्रः क्रौंइत्यंकुशमु
द्रयासूर्यमंडलंभित्वा ततोगंगातीर्थावाहनोत्तरं
सलिलबीजेनमूलेनचसप्तवारमभिमंत्र्यमुकु
ह्लमावर्तयन् मूर्धनित्रीनुदकांजलीन्दत्वा
त्रिरपश्चपीत्वा मूलपूर्वंश्रीमहात्रिपुरसुंदरी
स्नानेतिविभावयेत् तत्पादंगलितामृतधारया
क्षालितमात्मानमितिविभाव्यत्रिर्निमज्योन्मज्य
ततोयोनिमुद्रयाकुंभमुद्रयाचत्रिवारंस्नात्वा त
तोमूलान्तेश्रीललितांतर्पयामि इतित्रिस्तर्पणं
मूलेनत्रिःप्रोक्षणंचात्मनो योनिमुद्रयाविदध्या
त् गृहेविनातर्पणं अशक्तोचयथामंत्रभस्मस्ना
नयोरन्यतरंनिर्वर्त्य मूलेनत्रिराचमनप्रोक्षणेके
वलंकुर्यात् अथवाससीपरिधाय विधृतपुंड्रः
वैदिकींसंध्यामभिवंद्य तांत्रिकीमाचरेत् यथा
मूलेनत्रिराचम्य द्विःपरिमृज्य सकृदुपस्पृश्य
चक्षुषीनासिकेश्रोत्रे अंसेनाभिहृदयशिरश्चाभि
मृशेत् एवंत्रिराचम्य प्राणानायम्य पूर्ववत्त्रिरा
त्मानंचप्रोक्ष्य अंजलिनासलिलमादाय ह्रांह्रींह्रूं
हंसः मार्तंडभैरवायप्रकाशशक्तिसहितायएषो

श्रं ५

र्घ्यैः स्वाहा इति मंत्रेणोदयंते विवस्वते त्रिरर्घ्यं दत्वा
तन्मध्ये श्रीचक्रमनुचिंत्य तत्र ध्यायेत्कामेश्वरां
कस्थां कुरविंदमणिप्रभां शोणांबरस्रगालेपां
सर्वांगेण विभूषितां सौंदर्यशेवधिं सेक्षुचापपाशां
कुशोज्ज्वलां स्वभाभिरणिमाद्याभिः सेव्यां सर्वनिया
मिकां सच्चिदानंदवपुषं सदयापांगविभ्रमां सर्व
लोकैकजननीं स्मेरास्यां ललितांबिकां ततः १ मू
लप्रथमखंडं त्रिपुरसुंदरि विद्महे द्वितीयखं
डं पीठकामिनि धीमहि तृतीयखंडं तन्नः क्लिन्ने
प्रचोदयात् उद्यदादित्यमध्यवर्तिन्यै सर्वचैतन्यम
ध्यवर्तिन्यै सर्वचैतन्यमय्यै श्रीमहात्रिपुरसुंदर्यै पर
वोर्घ्यं स्वाहा इति मंत्रेण त्रिर्महेशेपदत्वार्घ्यम्ब २ मू
लेन श्रीमहात्रिपुरसुंदरीं तर्पयामि इति त्रिः संत
र्प्य मूलेन पूर्ववदाचम्य प्राणानायम्य जपप्रकरणे
ह्रैं ठ हृं ठ पं ठ रं ठ वं ठ सं ठ वक्ष्यमाणं ऋष्यादिन्यासत्रयं कृत्वा ध्यात्वा मनसो
पचारैः संपूज्य आदौ कूटगायत्रीं दशवारमावर्त्य
मूलमष्टोत्तरशतवारमावर्तयेत् पुनः करांगन्या
सादि कृत्वा गुह्यातिगुह्य इति मंत्रेण जपं देव्या वा
महस्ते समर्प्य आचम्य मंडलस्थतीर्थं विसर्जन
मुद्रया प्रथम कूटेन सूर्यमंडले विसृजेत् ततः
सपर्यासाधनानि संपाद्य ब्रह्मयज्ञादि निर्वर्त
येदिति कल्पसूत्रानुयायिनां तु द्वयमेव प्रातःसं
ध्यावश्यकी नान्या माध्याह्निकादयः अथ सप
र्याविधिः श्रीपरदेवतायै नमः अथ मौनवाक् या

गृहमंदिरमागत्य गोमयेनोपलिप्तद्वारस्थलाभ्यं
तरस्थरंगवल्याद्यलंकृतस्य धूपधूपितस्य वद्ध
वितानकुसुमस्रजलस्य पश्चिमद्वारे तिष्ठन् द
क्षवामशाखयोरूर्ध्वभागे च ऐं ह्रीं श्रीं भद्रकाल्यै
नमः ३ भैरवाय ०३ लंबोदराय ० इति क्रमेण
तिस्रो द्वारदेवताः संपूज्य ततः प्रविश्य आचम्य दे
शकालौ संकीर्त्य मम श्रीललितापरदेवता
प्रसादसिद्ध्यर्थं यथाशक्तिमिलितोपचारद्रव्यैः
श्रीपरदेवतायाः नित्यार्चनकर्म निवर्तयिष्ये
इति संकल्प्य विघ्नाहरणवसनाभरणानुलेप
नमाल्यैः संकल्पमात्रकल्पिताकल्पोवातांबूले
नजातीपत्रफललवंगैलाकर्पूराढ्ये पंचतिक्ते
नवाम्बुरभिलवदनः समास्तीर्णाङ्गणिवसनस्थ
इति शुचिनिवालात् तृतीयबीजेन द्वादशवारम
भिमंत्रिते मूलमंत्रोल्लिखिते चित्रकंबलाद्यन्यतमस्या
सने ३ आधारशक्तिकमलासनाय नमः इति पुष्पा
क्षतैरभ्यर्च्य प्राङ्मुख उदङ्मुखो वा पद्मासनाद्यन्य
तमासनेनोपविशेत् ३ रक्तद्वादशशक्तियुक्ताय
दीपनाथाय नमः इति भूमौ पुष्पांजलिं दद्यात् त
तः ३ समस्तगुप्तप्रकटसिद्धयोगिनीचक्रश्रीपा
दुकाभ्यो नमः इति मूर्ध्नि बद्धांजलिः स्ववामदक्षपा
र्श्वयोः क्रमेण पूर्ववत् श्रीगुरुपादुकामनुमुद्रा
यैः पंचमुद्राभिः श्रीगुरुं महागणपतिं प्रणम्य ऐं
ह्रः अस्त्राय फडित्यस्त्रमंत्रेणमुद्राहतेनांगुष्ठा

अ-
६

दिकनिष्ठांतंकरतलयोः कूर्परयोर्देहेचव्याप
कंकुर्यात् यथा ॐ ३ अमृताम्भोनिधयेनमः ३ र
त्नद्वीपाय ० ३ नानावृक्षमहोद्यानाय ३ कल्प
वाटिकायै ० संतानवाटिकायै ० ३ हरिचंदनवा
टिकायै ० ३ मंदारवाटिकायै ० ३ पारिजातवाटि
कायै ० ३ कदंबवाटिकायै ० ३ पुष्परागरत्नप्रा
काराय ० ३ पद्मरागरत्नप्राकाराय ० ३ गोमेद
रत्नप्राकाराय ० ३ वज्ररत्नप्राकाराय ० ३ वैडूर्य
रत्नप्राकाराय ० ३ इंद्रनीलरत्नप्राकाराय ० ३
मुक्तारत्नप्राकाराय ० ३ मरकतरत्नप्राकाराय ०
३ विद्रुमरत्नप्राकाराय ० ३ माणिक्यमण्डपाय ० ३
सहस्रस्तंभमंडपाय ० ३ अमृतवापिकायै ० ३
आनंदवापिकायै ० ३ विमर्षवापिकायै ० ३ बाला
तपोद्गाराय ० ३ चंद्रिकोद्गाराय ० ३ महाशृंगारप
रिखायै ० ३ महापद्माटव्यै ० ३ चिंतामणिगृहरा
जाय ० ३ पूर्वाम्नायमयपूर्वद्वाराय ० ३ दक्षिणा
म्नायमयदक्षिणद्वाराय ० ३ पश्चिमाम्नायमप
श्चिमद्वाराय ० ३ उत्तराम्नायमयोत्तरद्वाराय ० ३
रत्नप्रदीपवलयाय ० ३ मणिमयमहासिंहास
नाय ० ३ ब्रह्ममयैकमंचपादाय ० ३ विष्णुमयैक
मंचपादाय ० ३ रुद्रमयैकमंचपादाय ० ३ ईश्व
रमयैकमंचपादाय ० ३ सदाशिवमयमंचफ
लकाय ० ३ हंसतूलतलिमायै ० ३ हंसतूलम
होपधानायै ० ३ कौसुंभास्तरणाय ० ३ महावि

तानकायै ॐ महाजवनिकायैनम इतिवस्त्रंस्मृत्वा
दिशान्ते दिग्मंत्रैस्तन्नद्विलेभावयन्कुसुमाञ्जलिनेर
भ्यर्च्य ततोजलकलशंस्ववामभागे गंधपुष्पाक्ष
तादिकांसपर्यासामग्रिंसमग्रांस्वदक्षिणे क्षीरकल
शादिकंचदेव्याःपश्चाद्भागेनिधाय दीपानभितःप्र
ज्वालयेत् मूलेनश्रीचक्रेपुष्पाञ्जलिंदत्वा ॐ मूल
प्रथमकूटेनमः इतित्रिकोणस्याग्रकोणे ॐ द्विती
यकूटेनमः इतित्रिकोणस्येशानकोणे ॐ तृतीयकू
टेनमः इतित्रिकोणस्याग्नेयकोणेसंपूज्य भूतशु
द्धिंविदध्यात् यथा ॐ इडयावायुमापूर्य ॐ मूलशृंगा
टकात्सुषुम्नापथेनजीवशिवंपरशिवपदेयोजया
मि स्वाहेतिमंत्रेणमूलाधारस्थितंजीवात्मानंसुषु
म्नामार्गेणब्रह्मरंध्रेनीत्वापरशिवेनैकीभूतंभावय
न् कुंभयित्वापिंगलयावायुंविरेचयेत् एवमेवोत्त
रत्र ॐ यंसंकोचशरीरंशोषयशोषयस्वाहेतिनिज
देहंशोषितं ॐ रंसंकोचशरीरं दह २ पच २ स्वाहे
तिभस्मीकृतं ॐ वंपरशिवामृतंवर्षय २ स्वाहेति
तद्भस्मसहस्रारेंदुमंडलविगलदमृतरसासिक्तं
ॐ लंशोभवशरमुत्पादय २ स्वाहेति तद्भस्मनोदि
व्यशरीरमुत्पन्नंविभाव्य ॐ हंसःसोहमवतरावतर
शिवपदाज्जीवसुषुम्नापथेनप्रविश्य मूलशृंगाट
कमलंसोल्लस ज्वल २ प्रज्वल २ हंसःसोहंस्वाहेति
पराशिवेनैकीभूतंजीवं पुनःसुषुम्नावर्त्मनामूला
धारेस्थापितंविचिंतयेत् इतिभूतशुद्धिः हृदिदल

स्व· ७

करतलेनिधाय ॐ सोऽहमिति त्रिः पठेत् इति प्राणप्र
तिष्ठा ततस्त्रिवारं प्राणानायम्य अपसर्पन्तु ते भूता
ये भूता भूमिसंस्थिता ये भूता विघ्नकर्तारस्ते नश्यन्
तु शिवाज्ञया इति मंत्रेण सकृदस्त्राय युगपद्वामपा
र्ष्णिभूतलाघाततत्रयकरास्फोटयनयनक्रूरदृष्ट्या
वलोकनपूर्वतालत्रयेण भौमान्तरितदिव्यान्
भेदावभासकान् विघ्नानुत्सारयेत् नम इति मंत्रेण
शिखां बध्वा श्रीदेवीरूपमात्मानं भावयन् स्वदेहस्या
सजलात्मकं वज्रकवचं विदधीत अस्य श्रीमातृका
न्यासस्य ब्रह्मऋषये नमः शिरसि गायत्रीछन्दसे नमः
मुखे श्रीमातृकासरस्वत्यै देवतायै० हृदि हलभ्यो
बीजेभ्यो० गुह्ये स्वरेभ्यः शक्तिभ्यो० पादयोः बिंदुभ्यः
कीलकेभ्यो० नाभौ श्रीविद्यांगत्वेन न्यासे विनियोगा
य० करसंपुटे सं महौ मातृभिस्त्रिव्यापकं ३ अं कं ५
खं आं अंगुष्ठाभ्यां० ३ इं चं० ५ ईं तर्जनीभ्यां स्वाहा ३
उं टं० ५ ऊं मध्यमाभ्यां वषट्० ३ एं तं० ५ ऐं अना
मिकाभ्यां हुं ३ ओं पं० ५ औं कनिष्ठिकाभ्यां वौषट्० ३
अं यं रं लं वं शं षं सं हं लं क्षं अः करतल० फट् एवं हृद
यादिष्वपि पंचाशद्वर्णैर्नमामीति ध्यात्वा ऐं ह्रीं श्रीं ऐं
क्लीं सौः अं नमः शिरसि ९ आं नमः मुखे ९ इं नमः द
क्षनेत्रे ९ ईं नमः वामनेत्रे ९ ईं नमः वामनेत्रे ९ उं न
मः दक्षकर्णे ९ ऊं नमः वामकर्णे ९ ऋं नमः दक्षना
सापुटे ९ ॠं नमः वामनासापुटे ९ ऌं नमः दक्षगं
डे ९ ॡं नमः वामगंडे ९ एं नमः ऊर्ध्वोष्ठे ९ ऐं नमः

अधरोष्ठे ६ औंनमः ऊर्ध्वदन्तपंक्तौ ६ औंनमः अधो
दन्तपंक्तौ ६ अंनमः शिरसि ६ अःनमः जिह्वाग्रे
६ कंदक्षबाहुमूले ६ खं० दक्षकूर्परे ६ गं० दक्ष
मणिबंधे ६ घं० दक्षांगुलिमूले ६ ङं० दक्षांगुल्य
ग्रे ६ चं० वामबाहुमूले ६ छं० वामकूर्परे ६ जं०
वाममणिबंधे ६ झं० वामांगुलिमूले ६ ञं० वामां
गुल्यग्रे ६ टं० दक्षोरुमूले ६ ठं० दक्षजानुनी ६ डं०
दक्षगुल्फे ६ ढं० दक्षपादांगुलिमूले ६ णं० दक्ष
पादांगुल्यग्रे ६ तं० वामोरुमूले ६ थं० वामजानु
नी ६ दं० वामगुल्फे ६ धं० वामपादांगुलिमूले ६ नं
० वामपादाग्रे ६ पं० दक्षपार्श्वे ६ फं० वामपार्श्वे ६
बं० पृष्ठे ६ भं० नाभौ ६ मं० जठरे ६ यं० हृदि ६ रं०
दक्षकक्षे ६ लं० ककुदि ६ वं० वामकक्षे ६ शं०
हृदादिदक्षकराग्रांतं ६ षं० हृदादिवामपादाग्रांतं ६
लं० हृदादिगुह्यांतं ६ क्षं० हृदादिमूर्धांतं इतिमातृ
कान्यासः ऐंह्रींश्रींअंमध्यमाभ्यां० ३ आंअनामिका
भ्यांनमः ३ सौःकनिष्ठिकाभ्यांनमः० ३ अंअंगुष्ठा
भ्यांनमः० आंतर्जनीभ्यां० ३ सौःकरतलकरपृष्ठा
भ्यांनमः इतिकरशुद्धिन्यासः ३ ऐंक्लींसौः महात्रि
पुरसुंदर्यात्मानंरक्षरक्षेतिहृदयेंजलिंदद्यात् इत्या
त्मरक्षान्यासः ३ ह्रींक्लींसौः देव्यात्मासनायनमः
इतिस्वमूलाधारेन्यस्य ३ हैंहक्लींह्सौः श्रीचक्रा
सनाय० ३ हैंहक्लींह्सौः सर्वमंत्रासनायनमः ३
ह्रींक्लींब्लें साध्यसिद्धासनाय० इतित्रिभिर्मंत्रैः ३

ष्पालनलेपएचक्रेन्यस्य इतिचतुरासनन्यासः ३
ऐंहृदयायनमः ३ क्लींशिरसे० ३ सौः शिखा ३ ऐंक
वचायहुं ३ क्लींनेत्रत्र० सौः अस्त्रायफट् इतिवाला
षडंगन्यासः ३ अं० अआः ह्रूंवशिनीवाग्देवतायै०
शिरसि ३ कं० ५ क्लह्रींकामेश्वरीवाग्देवतायै० ल
लाटे ३ चं ५ न्व्लींमोदिनीवाग्देवतायै० भ्रूमध्ये
३ टं० ५ य्लूंविमलावाग्देवतायै० कंठे ३ तं ५
ज्म्रींअरुणावाग्देवतायै० हृदि ३ पं० ५ हस्ल्व्यूंजयि
नीवा० नाभौ ३ यंरंलंवं हस्म्र्यूंसर्वेश्वरीवा० लिंगे
शंषंसंहंलंक्षं क्ष्म्रींकौलिनी वा० मूलाधारेन्यसे
दितिवशिन्यादि …न्यासः अत्रः श्रीविद्यायाः ऋष्या
दिषडंगांतंविन्यस्य ३ कं नमः शिरसि ३ एं० मूले
३ ईं ३ ० हृदि ३ ४ ० दक्षनेत्रे ३ ह्रीं ५ वामनेत्रे ३ हं
६ ० भ्रूमध्ये ३ सं ७ ० दक्षश्रोत्रे ३ कंटनमः वाम
श्रोत्रे ३ हं ९ ० मुखे ३ लं १० दक्षभुजे ३ ह्रीं ११ ०
वामभुजे ३ सं १२ ३ कं० दक्षजानुनी ३ लं १४
० वामजानुनी ह्रीं १५ ० नाभौ इतिकादिविद्यावर्ण
न्यासः अथश्रीषोडशाक्षरीन्यासः ॐ ऐं ह्रीं श्रीं मू
लविद्यामुख्यायैनमः इत्येतेनदक्षमध्यनामिका
भ्यांशिरसिन्यसेत् तत्रतादीपाभास्ववस्त्रधारसौम
होसौभाग्यदांध्यात्वा पुनस्तथैवोच्चार्य महासौभा
ग्यमेदेहिपरसौभाग्यदेदयामीति सौभाग्यदेडि
न्यामुद्रयावामकर्णसंवेष्टनपूर्ववामांगे आम
स्तकचरणांतंन्यसेत् पुनस्तथैवोच्चार्य ममशत्रू

त्रिराट्पाह्वामीतिरिपुजिह्वाग्रहां मुद्रां पादादायो
न्यसेत् पुनस्तथैव तामुद्धार्य त्रैलोक्यसाहेक
त्रैति त्रिखिंडां भाले न्यसेत् पुनस्तथैव तामुद्धार्य
वदने वेष्टनं तेन्यसेत् पुनस्तथैव तामुद्धार्य गलो
र्ध्वमाशिरो न्यसेत् पुनस्तथैव तामायंतप्रणवामु
द्धार्य मस्तकात्पादपर्यंतं पादात्मस्तकं न्यसेत् पु
नस्तथैव तामुद्धार्य योनिमुद्रयामुखे न्यसेत् पुन
स्तथैव तामुद्धार्य योनिमुद्रया ललाटे न्यसेत् इ
ति मूलविद्यापूर्णन्यासः ततः श्रीविद्यां स्वात्मत्व
भया जगदरुणं विभावयन् अनामिकामूर्धपरि
भ्राम्य पुनःस्तथैतां पुनःपुनरुद्धार्य ब्रह्मरंध्रमणि
वंधहृदयभाले च विन्यसेत् एषः संमोहनन्यासः अत्र च
तुस्तारी नमः संपुटितान् मूलविद्याषोडशार्णा
न्क्रमेण न्यसेत् ४ श्रीं नमः पादयोः ४ ह्रीं ॰ जंघयोः
४ क्लीं ३ ॰ जान्वोः ४ ४ ऐं ॰ कटिभागद्वये ४ सौः
लिंगे ४ ६ ओं ॰ पृष्ठे ४ ह्रीं ॰ नाभौ ४ ८ श्रीं ॰ पार्श्व
योः ४ प्रथमकूटं नमः स्तनयोः ४ ह्रीं ॰ कूटं ॰
अंसयोः ४ तृ ॰ कूटं कर्णयोः ४ सौः शिरसि ४ ऐं
॰ मुखे ४ क्लीं ॰ नेत्रयोः ४ ह्रीं ॰ कर्णयोः ४ श्रीं
॰ कर्णवेष्टनयोः इति संहारन्यासः ४ श्रीं ॰ शिर
सि ४ ह्रीं ॰ भाले ४ क्लीं ॰ नेत्रयोः ४ ऐं ॰ कर्ण
योः ४ सौः ॰ नासापुटयोः ४ ओं ॰ गंडयोः ४ ह्रीं ॰
दंतपंक्त्योः ४ श्रीं ॰ ओष्ठयोः ४ प्रथमकूटं ॰ जि
ह्वायां ४ ह्रीं ॰ कूटं ॰ मुखांतः ४ तृ ॰ कूटं ॰ पृष्ठे

श्री· ५
१

ॐ सौः० सर्वांगे ॐ ऐं० हृदि ॐ क्लीं० स्तनयोः ॐ
ह्रीं० उदरे ॐ श्रीं० लिंगे ॐ मूलेन व्यापकं कुर्यात्
इति सृष्टिन्यासः ॐ श्रीं० अंगुष्ठयोः ॐ ह्रीं० तर्जन्योः
ॐ क्लीं मध्यमयोः ॐ ऐं० अनामिकयोः सौः कनिष्ठि
कयोः ॐ ॐ शिरसि ॐ ह्रीं० मुखे ॐ श्रीं० हृदि ॐ प्रथ
मकूटेन० नाभेः पादांतं ॐ ह्रीं० कूं० कंठादिना
भ्यांतं ॐ ह्रैं० कूटं० मूर्धादि कंठांतं ॐ सौः पादा
गुष्ठयोः ॐ ऐं पादतर्जन्योः ॐ क्लीं० पा० मध्यमयोः ॐ
ह्रीं० पा० नामिकयोः ॐ श्रीं० पा० कनिष्ठकयोः
इति स्थितिन्यासः अथ देव्याः पुरतः स्ववामभागे
जलकलशं गंधपुष्पाक्षतैः संपूज्य मूलेन सप्त
वारमभिमंत्र्य ततो दक्षिणतो देव्याः पुरतः कल
शजलेन विंदुत्रिकोणषट्कोणवृत्तचतुरस्रात्म
कं मंडलमत्स्यमुद्रया निर्माय पुष्पैरभ्यर्च्य चतु
रस्रस्याग्नीशासुरवायुकोणेषु मध्ये पूर्वादिक्षु च
क्रमेण ३ ऐं हृदयाय नमः ३ क्लीं शिरसे स्वाहा ३ सौः
शिखायै वौषट् ३ ऐं कवचाय हुं ३ क्लीं नेत्रत्रयाय
वौषट् ३ सौः अस्त्राय फट् इति पुष्पैः षडंगं न्यसेत्
अथ तत्र मंडले अस्त्राय फडिति क्षालितमाधारं ३
अं अग्निमंडलाय दशकलात्मने अर्घ्यपात्राधा
धाराय नमः इति निधाय तस्य पश्चिमादिप्रादक्षि
ण्येन ३ धूम्रार्चिषे नमः ३ ऊष्मायै० ३ ज्वलिन्यै
३ ज्वालिन्यै० ३ विस्फुलिंगिन्यै० ३ सुश्रियै० सुरू
पायै० ३ कपिलायै० ३ हव्यवाहायै० ३ कव्य

वा व्या ह्वाये नमः ३ मा धारे दश वह्निकलाः संपूज्य
श्राधारोपरि अस्त्रेण ताल्लिनं शंखं ॐ सूर्यमंडला
य द्वादशकलात्मने ऽर्घ्यपात्राय नमः इति प्रतिष्ठा
प्य सूर्यमंडलत्वेन विभाव्य ३ तपिन्यै ० ३ तापि
न्यै ० ३ धूम्राये ० ३ मरीच्यै ० ३ ज्वालिन्यै ० ३
रुच्यै ० ३ सुषुम्नायै ० ३ भोगदायै ० ३ विश्वायै
० ३ बोधिन्यै ० ३ धारिण्यै ० ३ क्षमायै नमः इति
द्वादशसूर्यकलाः पूजयेत् तस्मिन्शंखे ३ सोम
मंडलाय षोडशकलात्मने ऽर्घ्यामृताय नम इति
कर्पूरादिवासितं कलशस्थजलमापूर्य तीरविं
दुदत्वा सोममंडलत्वेन विचिंत्य ३ अमृतायै ० ३
मानदायै ० ३ पूषायै ० ३ तुष्ट्यै ० ३ पुष्ट्यै ० ३ रत्यै
० ३ धृत्यै ० ३ शशिन्यै ० ३ चंद्रिकायै ० ३ कान्त्यै ० ३
ज्योत्स्नायै नमः ३ श्रियै ० ३ प्रीत्यै ० ३ अंगदायै ० ३
पूर्णायै ० ३ पूर्णामृतायै ० ३ इति षोडशेंदुकलाज
येत् ३ श्रीं ह्रीं क्लीं सौः हृदयाय नमः हृदयश्रीपा
दुकां पूजयामि नमः ३ ॐ ह्रीं श्रीं शिरसे स्वाहा शिरः
शक्ति श्रीपादुकां ० ३ क ४ शिखायै वषट् शिखा
शक्ति श्रीपादुकां ० ३ ह ० ५ कवचाय हुं कवचश
क्ति श्री ० ३ स ३ नेत्रत्रयाय वौषट् नेत्रत्रयाय
शक्ति श्री ० ३ सौः ऐं क्लीं ह्रीं श्रीं अस्त्राय फट् अस्त्र
शक्ति श्रीपादुकां पूजयामि इति षडंगपूजनं अस्त्रा
य फडिति ऽस्त्रेण संरक्ष्य ३ कवचायहुमिति अवगुंठ
नमुद्रयावगुंठ्य धेनुयोनिमुद्रे प्रदर्श्य मूलेन

ग्र- सप्तवारमभिमंत्र्य तत्सलिलविंदुभिरात्मानं पू
९- जोपकरणानि चाभ्युक्ष्य शंखजलात्किंचिद्भूमौ
त्क्षिपेदिति सामान्यार्घ्यविधिः अथ सामान्यार्घ्योद
10 केन तद्दक्षिणतो विंदुत्रिकोणषट्कोणवृत्तचतुर
स्रात्मकं मंडलं परिकल्प्य विंदौ सानुस्वारं ह्रदीर्घ
३ ऐं० ह० ३ क्लीं० शि० स्वरमालिख्य चतुरस्रे प्रागवत्षडंगं विन्यस्य कू
३ सौः शि० ऐं० क० टत्रयैस्त्रिकोणान्नभ्यर्च्य क० ह० स० क० ह०
क्लीं ने० ३ सौः अ० स० पुरोभागादिप्रादक्षिण्येन कूटत्रयं द्विरावृत्त्या
षट्कोणस्य कोणेष्वक्रमेण कुसुमादिभिरभ्यर्च्य
अथ तत्र मंडले ३ ऐं अग्निमंडलाय दशकलात्मने
र्घ्यपात्राधाराय नमः इत्याधारं प्रतिष्ठाप्य ३ तस्मिन्पू
र्वोक्तप्रकारेण दशवह्निकलाः पूजयेत् ३ धूम्रार्चि
षे नमः ऊष्मायै० ३ ज्वलिन्यै० ३ ज्वालिन्यै० ३ वि
स्फुलिंगिन्यै० ३ सुश्रियै० ३ सुरूपायै० ३ कपिलायै०
३ हव्यवाहायै० ३ कव्यवाहायै० ३ तदुपरि पात्रं ह्रीं
सूर्यमंडलाय द्वादशकलात्मने र्घ्यपात्राय नम इ
ति प्रतिष्ठाप्य ३ ह्रीं ऐं महालक्ष्मीश्वरि परमस्वामिनू
र्ध्वशून्यप्रवाहिणि सोमसूर्याग्निभक्षिणि परमाकाश
भासुरे आगच्छागच्छ विश विश पात्रं प्रतिगृह्ण २
हुं फट् स्वाहेति पुष्पांजलिं विकीर्य प्रागवद्द्वादश
सूर्यकलाः संपूज्य तत्र पात्रे ३ सौः सोममंडलाय
षोडशकलात्मने र्घ्यामृताय नम इति कलशस्थ
कस्तूर्यादिभिः सुरभीकृतं क्षीरमभिपूर्य तस्मिन्ना
ईशकलं निक्षिप्य पूर्ववत्षोडश सोमकलाः संपूज्य

तस्मिन् विशेषार्घ्यामृते स्वाग्रादिप्रादक्षिण्येन
अकथादिषोडशवर्णात्मकं रेखात्रयं त्रिकोणं वि
लिख्य तदंतः स्वाग्रादिकोणेषु प्रादक्षिण्येन हलक्षा
न् वह्निस्थमूलकूटत्रयं विदोमविंदुं तूर्यस्वरं तद्वा
मदक्षयोः हंस इति च पाणौ विलिख्य ३ हंसः नमः
इति मंत्रेणाराध्य त्रिकोणस्य परितो वृत्तं निधाय
तद्बहिश्च षट्कोणं निर्माय स्वाग्रादिप्रादक्षिण्येन
प्राग्युक्तैः षडंगमंत्रैः षडंगशक्तिरभिपूज्य ३ मू
लांते तां चिन्मयीमानंदलक्षणामृतकलशपि
शितहस्तद्वयां प्रसन्नां देवीं पूजयामि नमः स्वाहे
ति सुधादेवीमपि समभ्यर्च्य तदर्घ्यामृते किंचि
त्पात्रांतरेण वषडिति हृत्य ३ स्वाहेति तत्रैवार्घ्या
मृते निक्षिप्य हूमित्यवगुंठ्य ३ वौषडिति धेनु
मुद्रया ३ मृतीकृत्य ३ फडिति संरक्ष्य नम इ
ति पुष्पं दत्वा गालिन्या मुद्रया ३ मूलेन निरीक्ष्य
योनिमुद्रया नत्वा मूलेन सनिताद्विकेण सप्त
वारमभिमंत्र्य गंधाक्षतपुष्पधूपदीपान् दत्वा
विशेषार्घ्यबिंदुभिस्समुक्षितसपर्यासाधनं स
र्वं विद्यामयं विभाव्य विशेषार्घ्यपात्रं करेण सं
स्पृश्य चतुर्नवतिमंत्रैरभिमंत्रयेत् धूम्रार्चि
षे नमः इत्याद्याः पूर्वोक्तावह्निदशकलाः ३ धू
म्रार्चिषे नमः ० ३ ऊष्मायै ० ३ ज्वलिन्यै ० ३ ज्वा
लिन्यै ० ३ विस्फुलिंगिन्यै ० ३ सुश्रियै ० ३ सु
रूपायै ० ३ कपिलायै ० ३ हविवाहायै ० ३ क

अ- ११ ||

पिलायै० ३ हविर्वाहायै० ३ कव्यवाहायै० १०
अथ सूर्यकला द्वादश तपिन्यै० ३ तापिन्यै० ३
धूम्रायै० ३ मरीच्यै० ३ ज्वालिन्यै० ३ रुच्यै० ३
सुषुम्नायै० ३ भोगदायै० ३ विश्वायै० ३ बोधि
न्यै० ३ धारिण्यै० ३ क्षमायै० १२ अथ सोमकला ३
अमृतायै० ३ मानदायै० ३ पूषायै० ३ तुष्ट्यै० ३
पुष्ट्यै० ३ रत्यै० ३ धृत्यै० ३ शशिन्यै० ३ चन्द्रिकायै
० ३ कान्त्यै० ३ ज्योत्स्नायै० ३ श्रियै० ३ प्रीत्यै० ३
अङ्गदायै० ३ पूर्णायै० ३ पूर्णामृतायै नमः १६
एवं आहत्य अष्टत्रिंशत् ततः ३ सृष्ट्यै० ३ ऋद्ध्यै
० ३ मेधायै० ३ कान्त्यै० ३ लक्ष्म्यै० ३ द्युत्यै० ३ स्थि
रायै० ३ स्थित्यै० ३ सिद्ध्यै० ३ लक्ष्म्यै० ३ द्युत्यै
० ३ स्थिरायै० ३ स्थित्यै० ३ जरायै० ३ पालिन्यै
० ३ शान्त्यै० ३ ईश्वर्यै० ३ रत्यै० ३ कामिका
यै० ३ वरदायै० ३ ह्लादिन्यै० ३ प्रीत्यै० ३ दी
र्घायै० ३ तीक्ष्णायै० ३ रौद्र्यै० ३ भयायै० ३
निद्रायै० ३ तन्द्र्यै० ३ क्षुधायै० ३ क्रोधिन्यै
० ३ क्रियायै० ३ उद्गार्यै० ३ मृत्यवे० ३ पी
तायै० ३ श्वेतायै० ३ अरुणायै० ३ असिता
यै० ३ निवृत्त्यै० ३ प्रतिष्ठायै० ३ विद्यायै
० ३ शान्त्यै० ३ इन्धिकायै० ३ दीपिकायै० ३
रेचिकायै० ३ मोचिकायै० ३ परायै० ३
सूक्ष्मायै० ३ सूक्ष्मामृतायै० ३ ज्ञानामृता
यै० ३ आप्यायिन्यै० ३ व्यापिन्यै० ३ व्योमरू

पायैनमः ५ ० १ हंसः शुचिषद्वसुरंतरि
क्षसद्धोता वेदिषदतिथिर्दुरोणसत् नृष
द्वरसदृतसद्व्योमसदब्जागोजाऋतजाऽ
द्रिजाऋतं बृहत् १ १ प्रतद्विष्णुस्तवते वीर्ये
णमृगोनभीमः कुचरोगिरिष्ठाः यस्योरुषुत्रिषु
विक्रमणेष्वधिक्षियंति भुवनानि विश्वा २ १
त्र्यंबकं यजामहे सुगंधिं पुष्टिवर्धनं उर्वारुक
मिवबंधनात् मृत्योर्मुक्षीयमामृतात् १ १ त
द्विष्णोः परमं पदं सदा पश्यंति सूरयः दिवीव
चक्षुराततं तद्विप्रासो विपण्यवो जागृवांसः
समिंधते विष्णोर्यत्परमं पदम् ४ १ विष्णुर्यो
निं कल्पयतु त्वष्टा रूपाणि पिंशतु आसिंचतु
प्रजापतिः धाता गर्भं दधातु ते गर्भं देहि सि
नीवालि गर्भं देहि सरस्वति गर्भं ते अश्विनौ दे
वावाधत्तां पुष्करस्रजा ५ मूले ८ आहत्यमंत्रा
स्तु नवतिः १ अखंडैकरसानंदकरे परसु
धात्मनि स्वच्छंदस्फुरणामत्र निधेह्यकुलना
यिके १ १ अकुलस्थामृताकारे शुद्धज्ञानकरे
परे अमृतत्वं निधेह्यस्मिन्वस्तुनि क्लिन्नरूपि
णि २ तद्रूपिण्यैकरस्यत्वं कृत्वा ह्येतत्स्वरूपि
णि भूत्वा परामृताकारा मयि चित्स्फुरणं कु
रु ३ ३ ऐं ब्लूं झ्रौं जूं सः अमृते अमृतोद्भवे
अमृतेश्वरि अमृतवर्षिणि अमृतं स्रावय २
स्वाहा ४ १ ऐं वद वद वाग्वादिनि ऐं क्लीं क्लिन्ने

अ॰
१२
12

क्लेदिनि क्लेदयमहामत्तोभं कुरु २ ह्रीं सौः मो
हं कुरु २ ह्सौः स्हौः इत्येतैर्मंत्रैरभिमंत्र्य त
दर्घ्यामृतं ज्योतिर्मयं विभाव्य एतदर्घ्यशो
धनं विशेषार्घ्यामृतात्माग्रान्तरेण किंचिदुद्
धृत्य तद्बिंदुभिस्त्रिवारं श्रीगुरुपादकामंत्रेण शि
रसि श्रीगुरुं यजेत् सन्निहितो यदि निवेदयेत्
ॐ आर्द्रंज्वलति ज्योतिरहमस्मि ज्योतिर्ज्वलति
ब्रह्माहमस्मि योऽहमस्मि ब्रह्माहमस्मि अहम
स्मि अहमेवाहं मां जुहोमि स्वाहेति मंत्रेणा
त्मनः कुंडलिनीरूपे चिदग्नौ होममनुध्याज्जुहु
यात् विशेषार्घ्यपात्रं च न चालयेत् तीरं कल
शे क्षिपेत् आ विसर्जनं शंखं विशेषार्घ्यपात्रं च
न चालयेत् सूत्ररीत्या पात्रद्वयमेव इति विशे
षार्घ्यस्थापनविधिः अथांतर्यागः मूलाधारादा
ब्रह्मबिलं विलसंतीं बिसतंतुतनीयसीं विद्युत्पुं
जाभां विवस्वदयुतभास्वरप्रकाशां परशांत
सुधामयूखशीतलां तेजोदंडरूपां परचितं भा
वयेत् अथ हृदि श्रीचक्रे विभाव्य ततस्तामेव
स्वीकृतप्रागुक्तरूपां श्रीदेवीं ध्यात्वा वक्ष्यमाणै
र्गंधादितांबूलांतसडुपचार मंत्रै रुपचर्य तां
पुनस्तेजोरूपेण परिणतां परशिवज्योतिर
भिन्नप्रकाशात्मिकां वियदादिविश्वकारणं स
र्वावभासिकां स्वात्माभिन्नां परचितं सुषुम्णाप
थेनोर्ध्वमध्य निर्भिन्नविधिबिलविलसदमल

दशशतदलकमलं ब्रह्मनासापुटेन निर्गतां त्रि
खंडमुद्रामंडितशिखंडेकुसुमगर्भितेंजलौसमा
नीय ३ ह्रीं श्रीं सौः महात्रिपुरसुंदर्यै स्तवैतन्मू
र्तिं कल्पयामि नमः इति मंत्रमुच्चारयन् निजली
लांगीकृतललितवपुषं विचिंत्य ३ ह्सैं ह्स्क्लीं ह्सौः
महापद्मवनांतस्थे कारणानंदविग्रहे सर्वभूत
हिते मातरेह्येहि परमेश्वरि इति मंत्रेण बिंदुपीठग
तनिर्विशेषब्रह्मात्मक श्रीमत्कामेश्वरीकेपरदेव
तामावाहयेत् अथ नित्यादिकमणिमान्तं श्रीकाम
शाकोपवेशनेविना श्रीदेवीसमानाकृतिवेषभू
षायुधं शक्तिचक्रमोच त्रयगुरुमंडलं च वत्पमा
णेष्वावरणेषु निजस्वामिन्यभिमुखोपविष्टमव
स्थाप मूलेनवाहनसंस्थापनसन्निधापनसन्नि
रोधन संमुखीकरणावगुंठनवंदनैः येतुयोनि
मुद्राः प्रदर्शयेत् तदखिलंभावयेत् मेरुमंत्रा
त्मकं चक्रं श्रीत्रिपुरस्त्रदेवताः कामेश्वरः प्रका
शात्मा श्रीविमर्शानंदकरा इत्येतद्वासनारूप
ममेदं च परस्परं ज्ञाता श्रीगुरुवक्त्राज्ञात्मकताप्रू
जामहाफला मेरुमंत्रः चतुरस्रादिचक्रनवक
विशेषणगतैर्लकादिभिरवर्वैर्ज्ञातव्याः अथश्री
परदेवतायाश्चतुःषष्टी उपचारानाचरेत् तेषुश
क्यानांभावनया सामान्यार्घ्योदकात्किंचित्किंचि
दंयाचरणांबुजेर्पणबुध्या पात्रांतरेनिक्षिपेत् प्र
क्षालतान्वासमर्पयेत् चतुःषष्ट्युपचारमंत्रायथा

श्र· १३
13

ऐं ह्रीं श्रीं ललितायै पात्रं कल्पयामि नमः ३ श्री
महा० आभरणावरोपणं क० ३ श्रीमहा० सु
गंधतैलाभ्यंगं क० ३ श्रीमहा० मज्जनशाला
प्रवेशनं क० ३ श्रीमहा० मज्जनमण्डपमणि
पीठोपवेशनं क० श्रीमहा० दिव्यस्नानीयोद्व
र्तनं क० ३ श्रीमहा० उष्णोदकस्नानं क० ३
श्रीमहा० कनककलशच्युतसकलतीर्थाभि
षेकं क० ३ श्रीमहा० धौतवस्त्रपरिमार्जनं ०
३ श्रीमहा० अरुणदुकूलपरिधानं क० ३ श्रीम
हा० अरुणकुचोत्तरीयं क० ३ श्रीमहा० आले
पमंडपप्रवेशनं क० ३ श्रीमहा० आलेपमंडप
मणिपीठोपवेशनं क० ३ श्रीमहा० चंदनागरु
कुंकुमसंकुमृगमदकर्पूरकस्तूरिगोरोचनादि
दिव्यगंधसर्वांगीणं विलेपनं क० ३ श्रीमहा० के
शभरस्य कालागरुधूपं क० ३ श्रीमहा० मल्लि
कामालतीजातीचंपकाशोकशतपत्रपूगकह्ली
पुन्नागकल्हारमुख्यसर्वर्तुकुसुममालाः क० ३
श्रीमहा० भूषणमंडपप्रवेशनं क० ३ श्रीमहा
० भूषणमंडपमणिपीठोपवेशनं क० ३ श्रीम
हा० नवमणिमुकुटं कल्पयामि० ३ श्रीमहा
० चंद्रशकलं क० ३ श्रीमहा० सीमंतसिंदूरं क
० ३ श्रीमहा० तिलकरत्नं क० ३ श्रीमहा० का
लांजनं क० ३ श्रीमहा० पालीयुगलं क० ३ श्री
महा० मणिकुंडलयुगलं क० ३ श्रीमहा० ना

स्राभरणेकं॰ ३ श्रीमहा॰ अथरयावकं॰ ३ श्री
महा॰ प्रथमभूषणेकं॰ ३ श्रीमहा॰ कनक
चिंताकंकं॰ ३ श्रीमहापदकंकं॰ ३ श्रीमहा॰
महापदकंकं ३ श्रीमहा॰ मुक्तावलिकं॰ ३
श्रीमहा॰ एकावलिकं॰ ३ श्रीमहाछन्नवीरं
कं॰ ३ श्रीमहा॰ केयूरयुगलचतुष्टयकं॰ ३
श्रीमहा॰ वलयावलिकं॰ ३ श्रीमहा॰ ऊर्मि
कावलिकं॰ ३ श्रीमहाकांचीदामकं॰ ३ श्रीम
हा॰ कटिसूत्रंकं॰ ३ श्रीमहासौभाग्याभरणेक
॰ ३ श्रीमहापादकटकं॰ ३ श्रीमहा॰ रत्ननूपु
रंकं॰ ३ श्रीमहा॰ पादांगुलीयकंकं॰ ३ श्रीमहा
॰ आचमनीयंकं॰ ३ श्रीमहा॰ कर्पूरवीटीकांकं॰ ३
श्रीमहा॰ आनंदोल्लासविलासहासंकं॰ ३ श्रीमहा
॰ मंगलार्तिकंकं॰ ३ श्रीमहा॰ स्थालकेष्टदल
विलिख्य शर्करायुक्तगोधूमपिष्टनिर्मितानि घृ
तपक्वानि ऊर्द्धमर्दीकाराणि कृतनवर्तिकासहितानि
नवसंख्यानि अष्टदलेष्वष्टौ दीपपात्राणि मध्ये
नवमं संस्थाप्य हृल्लेखया प्रज्वाल्य श्रीं ह्रीं क्लूं स्लूं
ल्रूं म्लूं ल्लूं ह्रूं नवाश्चर्यो रत्नेश्वरी विद्ययाभिमंत्र्य
चक्रमुद्रां प्रदर्श्य मूलेनाभ्यर्च्य गजध्वनिमंत्रमा
तः स्वाहेतिमंत्रपूर्वकं गंधादिना घंटामभ्यर्च्यातां
वादयन् जानुभ्युवितभूतलस्तत्पात्रमामस्तकमुद्
त्य समस्तचक्रेश्वरीयुते देवि नवात्मिके आरार्तिक
मिदं देवि गृहाण मम सिद्धये इति मंत्रेण नववा

श्र·
१४
14

रंनीराजयेत् इति मंगलार्तिकं कृत्वा ३ श्रीमहा
० छत्रं क० ३ श्रीमहा० तालवृन्तं क० ३ श्रीम
हा० गंधं क० ३ श्रीमहा० पुष्पं क० ३ श्रीमहा
० धूपं क० ३ श्रीमहा० दीपं क० देव्यग्रतश्चतु
रस्रं मंडलं परिकल्प्य तत्राधारं प्रतिष्ठाप्य तदुप
रि यथा विभवनिर्मितान्नभरितं पात्रं संस्थाप्य मू
लेन प्रोक्ष्य वमिति धेनुमुद्रयामृतीकृत्य त्रि
वारं मूलेनाभिमंत्र्य अमृतोपस्तरणमसीत्यापो
शनं दत्त्वा ३ श्रीमहा० नैवेद्यं क० निवेद्य उत्त
रापोशनं अमृतापिधानमसीति दत्त्वा हस्तप्र
क्षालनं गंडूषाचमनं कर्पूरवीटिकाद्युपचारमं
त्रैः कल्पयित्वा द्रां द्रीं क्लीं ब्लूं सः क्रों ह्स्ख्फ्रें ह्सौः ऐं इ
ति संक्षोभिण्यादि नव मुद्राः प्रदर्श्य योनिमिति त्रिख
ण्डामपि प्रदर्शयेत् ततः ऐं ह्रीं श्रीं मूलं ललिताश्री
पादुकां पूजयामि इति तत्त्वमुद्रया संदष्टार्द्रशाक
लगृहीत विशेषार्घ्यबिंदुं सहार्पितेदलकरोपा
त्तकुसुमाक्षतैः श्रीदेवीं त्रिः संतर्पयेत् इति देवी
पूजनं अनेनैव प्रकारेण सर्वासामावरणदेवतानां
तर्पणं ज्ञेयं अथ श्रीदेव्या गेहाग्नीशासुरवाय
व्यकोणेषु मध्ये दिक्षु च पूर्वोक्तप्रकारेण षडंगश
क्तीः पूजयेत् अथ मध्यत्रिकोणस्य त्रिरेखासु प्र
तिरेखायां अकारादि पंच पंच स्वरान् विभाव्य विं
दौ विसर्गस्वरं विभावयेत् तत्र स्वाग्रकोणमारभ्य
वामावर्तेन कामेश्वर्यादि पंचदश नित्याः पूजये

त् यथा ३ ऐं भगभुगे भगिनि भगोदरि भगमाले
भगावहे भगगुह्ये भगयोनि भगिनि पातिनि
ऐं सकलह्रीं नित्यक्लिन्ने मदद्रवे सौः कामेश्वरी
नित्याश्रीपा·० ३ ऐं भगभुगे भगिनि भगोदरि
भगमाले भगावहे भगगुह्ये भगयोनि भगिनी
पातिनी सर्वभोगवशंकरी भगरूपे नित्यक्लिन्ने
क्लिन्नद्रवे क्लेदय द्रावय अमोघे भगविच्चे क्षुभ:
क्षोभय सर्वसत्वान् भगेश्वरी ऐं ब्लूं जं ब्लूं भें ब्लूं मों
ब्लूं हें क्लिन्ने सर्वाणि भगानि मे वशमानय स्त्रीं हर
ब्लें ह्रीं भगमालिनी नित्याश्रीमा० ३ ॐ ह्रीं नित्य
क्लिन्ने मदद्रवे स्वाहा नित्यक्लिन्ना नित्यश्रीपादुकां०
३ ॐ क्रों भ्रों क्रों स्रों छ्रों ज्रों स्वाहा भेरुंडा नित्याश्रीपा-
० ३ ह्रीं क्लिन्ने ऐं क्रों नित्यमदद्रवे ह्रीं महावज्रेश्वरी
नित्याश्रीपा·० ३ ह्रीं शिवदूत्यै नमः शिवदूती नि
त्याश्रीपा० ३ ह्रीं हूं खेचछेक्षः स्त्रीं हूं क्षें ह्रीं फट् त्व
रिता नित्याश्रीपा० ३ ऐं क्लीं सौः कुलसुंदरी नि
त्याश्रीपादु·० ३ ह्सकलरडैं ह्सकलरडीं ह्स
कलर ॐ नित्यानित्यश्रीपा·० ३ ह्रीं फ्रें स्रूं क्रों आं
क्लीं ऐं ब्लूं नित्यमदद्रवे ॐ फ्रें ह्रीं नीलपताकानि
त्याश्रीपा·० ३ भम्र्यौं विजया नित्याश्रीपा·० ३ स्वौं स
र्वमंगला नित्याश्रीपा·० ३ ॐ नमो भगवति ज्वाला
मालिनि देवदेवि सर्वभूतसंहारकारिके जात
वेदसि ज्वलंति ज्वल प्रज्वल २ ह्रां ह्रीं हूं र र र र र
रज्वालामालिनि ॐ फट् स्वाहा ज्वालामालिनी

श्री· नित्याश्रीपा·० क्लीं चित्रानित्याश्री·० श्रीपंचदशी
१५ स्वरूपार्थ ललितामहानित्यापा·० स्वरविभावना
15 क्रमेणैव पंचदशतिथि नित्याः संपूज्य विद्यां षोड
शीं यजेत् ततो देव्याः पृष्ठभागे गुरुपंक्तिं यजेत् ३
परप्रकाशानंदनाथश्री·० ३ परमशिवानंदना
थश्रीपा·० ३ परशक्तिदेव्यंबाश्री·० कौलेश्वराने
दनाथश्री० ३ शुक्लादेव्यंबाश्री·० ३ कुलीश्वरा
नंदनाथश्री·० ३ कामेश्वर्यंबाश्री·० ३ इति
दिव्यौघः ३ भोगानंदनाथश्री·० ३ क्लिन्नानंदना
थश्रीपा·० ३ समयानंदनाथ·० ३ सहजानंद
नाथ ० ३ इति सिद्धौघः ३ गगनानंदनाथश्री·० ३
विश्वानंदनाथश्री·० ३ विमलानंदनाथश्री·० ३
मदनानंदनाथश्री·० ३ भुवनानंदनाथश्री·० ३
लीलानंदनंदनाथश्री ० ३ स्वात्मानंदनाथश्री ०
प्रियानंदनाथश्री ० ३ इति मानवौघः इति काम
राजविद्या गुरुपारंपर्यं एवमेव श्रीषोडशाक्ष
र्यामपीति ज्ञानार्णवमतम् विद्यार्णवनिबंधे तु
श्रीषोडशीगुरुपारंपर्ये विशेषः ३ व्योमातीतां
बाश्री·० ३ व्योमेश्यंबाश्री ० ३ व्योमगांबाश्री·० ३
व्योमचारिण्यंबाश्री·० ३ व्योमस्थांबाश्री ० इति
दिव्यौघः ३ उन्मनाकाशानंदनाथश्री ० ३ सम
नाकाशानंदनाथश्री ० ३ व्यापकाकाशानंदना
थश्री ० ३ शक्त्याकाशानंदनाथश्री ० ३ ध्वन्या
काशानंदनाथश्री ० ३ ध्वनिमात्राकाशानंदना

थश्री॰ ०३ अनाहताकाशानंदनाथश्री॰ ०३
विंद्वाकाशानंदनाथश्री ०३ ईहाकाशानंदना
थश्री॰ ०३ इति सिद्धौघः ३ परमात्मानंदनाथश्री
०३ शांभवानंदनाथश्री ०३ चिन्मुद्रानंदनाथ
श्री ०३ वाग्भवानंदनाथश्री ०३ लीलानंदनाथ
श्री ०३ संभ्रमानंदनाथश्री ०३ चिदानंदनाथश्री॰
०३ प्रसन्नानंदनाथश्री ०३ विश्वानंदनाथश्री॰ ०
३ इति मानवौघः अथ त्रयोनेस्वशिरसि गुरुपा
दकामंत्रेण श्रीगुरून् विसर्जयेत् इति गुरुमंडला
र्चनं एतावत्तर्यागपूजनं अथावरणपूजा स्व
ल्कारुणपीतवर्णस्य लकारप्रकृतिक पृथिव्या
त्मस्य चतुरस्रस्य प्रवेशरीत्या प्रथमरेखायां प्रश्चि
मादिद्वारचतुष्टयं दक्षिणभागेषु वायव्यादिको
णेषु च पश्चिमनैर्ऋतयोः पूर्वेशानयोश्च मध्ये क्र
मेण ३ अणिमासिद्धिश्री ०३ लघिमासिद्धिश्री ०३
महिमासिद्धिश्री ०३ ईशित्वसिद्धिश्री॰ ०३ वशित्व
सिद्धिश्री ०३ प्राकाम्यसिद्धिश्री ०३ भुक्तिसिद्धि ०३
इच्छासिद्धिश्री ०३ प्राप्तिसिद्धिश्री ०३ सर्वकामासि
द्धिश्री ०३ इति स्वस्य तत्तदभिमुखत्वं भावयन् पूज
येत् एवमुत्तरत्रापि अत्र देव्याः पुरतः पश्चिमादिक
पश्चिमनैर्ऋतयोर्मध्ये अधोदिक् पूर्वेशानयोर्म
ध्ये चोर्ध्वदिक् इति विवेकः अथ चतुरस्रमध्यरेखा
यां प्राग्रुक्तेषु द्वारवामभागेषु कोणेषु च क्रमेण ३
ब्राह्मीश्री ०३ माहेश्वरीश्री ०३ कौमारी ०३ वैष्ण

वी० २ वाराही श्री० २ इंद्राणी श्री० २ चामुंडा श्री०
२ महालक्ष्मी श्री० २ चतुरस्रान्तरेखायां प्रथ
मरेखोक्तक्रमेण २ सर्वसंक्षोभिणी श्री० २
सर्वविद्राविणी श्री० २ सर्वाकर्षिणी श्री० २ स
र्ववशंकरी श्री० २ सर्वोन्मादिनी श्री० २ सर्व
महांकुशा श्री० २ सर्वखेचरी श्री० २ सर्वबीजा
श्री० २ सर्वयोनि श्री० २ सर्वत्रिखंडा श्री० २ इ
ति पूजयित्वा २ एताः प्रकटयोगिन्यस्त्रैलोक्यमो
हनचक्रे समुद्राः ससिद्धयः सायुधाः सशक्त
यः सवाहनाः सपरिवाराः सर्वोपचारैः संपू
जिताः संत्विति तासामेव समष्ट्यर्चनं पुष्पांजलि
ना कृत्वा अणिमासिद्धेः पुरतः २ अंआंसौः त्रिपुरा
चक्रेश्वरी श्रीपा० २ इति संपूज्य द्रां इति सर्वसंक्षो
भिणी मुद्रां प्रदर्शयेत् इति प्रथमावरणम् एवं
नवर्ण सकारप्रकृति षोडशकलात्मकं चंद्रस्व
रूपे स्ववदमृतरसे षोडशदल कमले देव्य
ग्रदलमारभ्य प्रादक्षिण्येन २ कामाकर्षिणी
नित्याकला श्री० २ अहंकाराकर्षिणी श्री० २ शब्दा
कर्षि० श्री० २ स्पर्शाकर्षि० श्री० २ रूपाकर्षि०
श्री० २ रसाकर्षि० श्री० २ गंधाकर्षि० श्री० २
चित्ताकर्षि० २ धैर्याकर्षि० श्री० २ स्मृत्याकर्षि०
श्री० २ नामाकर्षि० श्री० २ बीजाकर्षि० श्री० २
आत्माकर्षि० २ अमृताकर्षि० श्री० २ शरीराकर्षि
० श्री० २ इत्यभ्यर्च्य एताः गुप्तयोगिन्यः सर्वाशाप

रिपूरक चक्रे समुद्राः ससिद्धयः सायुधाः स
शक्तयः सवाहनाः सपरिवाराः सर्वोपचारैः
संपूजिताः सन्तु इति समष्ट्यर्चनं विधाय कामा
कर्षिण्यः प्रकटः ३ ऐं क्लीं सौः त्रिपुरेशी चक्रेश्वरी
श्री० ३ द्रीं सर्वविद्रावणी मुद्रां प्रदर्शयेत् इति
द्वितीयावरणम् हकार प्रकृतिकाष्टमूर्त्यात्मक
शिवाभिन्ने जपाकुसुमसन्निभेष्टपत्रे देव्याः पृ
ष्ठदलमारभ्य पूर्वादिदिक्ष्वाग्नेय्यादिविदिक्षु च
क्रमात् ३ अनंगकुसुमश्री० ३ अनंगमदनश्री०
३ अनंगमदनातुरश्री० ३ अनंगरेखाश्री० ३ अ
नंगवेगिनीश्री० ३ अनंगांकुशाश्री० ३ अनंग
मालिनीश्री० ३ एताः गुप्ततरयोगिन्यः सर्वसं
क्षोभिणी चक्रे समुद्राः ससिद्धयः सायुधाः सश
क्तयः सवाहनाः सपरिवाराः सर्वोपचारैः संपू
जिताः सन्तु इति समष्ट्यर्चनं पुष्पाञ्जलिना कृत्वा
इत्यादि पूर्ववत् अनंगकुसुमाद्या अग्रे ३ हैं ह्क्लीं
ह्सौः त्रिपुरसुन्दरी चक्रेश्वरी श्री० ३ क्लीं सर्वाकर्षि
णीमुद्रां प्रदर्शयेत् इति तृतीयावरणं ईकारप्रकृ
ति चतुर्दशभुवनात्मक महामायारूपे दाडिमी
प्रसून मनोहरे चतुर्दशारे देव्यग्रकोणमारभ्य
वामावर्तेन ३ सर्वसंक्षोभिणीश्री० ३ सर्वविद्रा
विणीश्री० ३ सर्वाकर्षिणीश्री० ३ सर्वाह्लादिनी
श्री० ३ सर्वसंमोहिनीश्री० ३ सर्वस्तंभिनीश्री० ३
सर्वजृंभिणीश्री० ३ सर्ववशंकरीश्री० ३ सर्वरंजि

श्र·
१८
17

नीश्री ० ३ सर्वोन्मादिनीश्री ० ३ सर्वार्थसाधि
नीश्री ० ३ सर्वसंपत्तिपूरिणीश्री ० ३ सर्वमंत्र
मयीश्री ० ३ सर्वद्वंद्वक्षयंकरीश्री ० ३ एताः
संप्रदाययोगिन्याः सर्वसौभाग्यदायके चक्रे
समुद्राः ससिद्धयः सायुधाः सशक्तयः सवाहनाः
सपरिवाराः सर्वोपचारैः संपूजिताः संतु इति
समष्ट्यार्चनं पुष्पांजलिना कृत्वा इत्यादि प्राग्वत्
सर्वसंक्षोभिण्याः पुरतः ३ ह्रैं ह्क्लीं त्रिपुरवासि
नीचक्रेश्वरी ० ३ ह्रूं इति सर्ववशंकरीमुद्रां प्र
दर्शयेत् इति चतुर्थावरणम् एकारप्रकृतिद
शावतारात्मक विष्णुस्वरूपे प्रभापराभूते सिंह
रेवहिर्दशारे देव्यग्रकोणमारभ्य प्रदक्षिणेन ३
सर्वसिद्धिप्रदाश्री ० ३ सर्वसंपत्प्रदाश्री ० ३ सर्व
प्रियंकरीश्री ० ३ सर्वमंगलकारिणीश्री ० ३ स
र्वकामप्रदाश्री ० ३ सर्वदुःखविमोदिनीश्री ० ३
सर्वमृत्युप्रशमनीश्री ० ३ सर्वविघ्ननिवारिणी
श्री ० ३ सर्वांगसुंदरीश्री ० ३ सर्वसौभाग्यदायिनी
श्री ० ३ एताः कुलोत्तीर्णयोगिन्यः सर्वार्थसाधके च
क्रे समुद्राः ससिद्धयः सायुधाः सशक्तयः सवाहनाः
सपरिवाराः सर्वोपचारैः संपूजिताः संतु इति सम
ष्ट्यार्चनं पुष्पांजलिना कृत्वा इत्यादि पूर्ववत् सर्व
सिद्धिप्रदायाः पुरतः ह्सैं ह्स्क्लीं ह्सौः त्रिपुराश्रीचक्रे
श्वरीश्री ० ३ सः सर्वोन्मादिनीमुद्रां प्रदर्शयेत् इति
पंचमावरणम् ककारैकप्रकृतिकं दशकलात्म

कवेष्वनराभिन्ने जपाकुसुमसमरुचरेर्नदशारेदे
व्यग्रकोणमारभ्यवामावर्तेन ३ सर्वज्ञाश्री॰ ३
सर्वशक्तिश्री॰ ३ सर्वैश्वर्यप्रदाश्री॰ ३ सर्वज्ञा
नमयीश्री॰ ३ सर्वव्याधिविनाशिनीश्री॰ ३ स
र्वाधारास्वरूपाश्री॰ ३ सर्वपापहराश्री॰ ३ स
र्वानंदमयीश्री॰ ३ सर्वरक्षास्वरूपिनीश्री॰ ३ स
र्वेप्सितफलप्रदाश्री॰ ३ एतानिगर्भयोगिन्यः
सर्वरक्षाकरेचक्रे समुद्रादियथापूर्वे सर्वज्ञायाः
पुरतः ह्रींक्लींह्रीं त्रिपुरमालिनीचक्रेश्वरीश्री॰ ३
क्रों इतिसर्वमहांकुशमुद्रांप्रदर्शयेत् इतिस
प्तावरणम् ककारप्रकृतिकाष्टमूर्त्यात्मकका
मेश्वरस्वरूपेपद्मरागरुचिरेष्टारेदेव्यग्रकोणमा
रभ्यप्रादक्षिण्येन ३ अंआं॰ अः ह्लींवशिनीवा
ग्देवताश्री॰ ३ कं॰ ५ कल्ह्रींकामेश्वरीवाग्देव
ताश्री॰ ३ चं॰ ५ ह्लींमोदिनीवाग्देवताश्री॰ ३ टं
॰ ५ ह्रींविमलवाग्देवताश्री॰ ३ तं॰ ५ ज्म्रीं
अरुणवाग्देवताश्री॰ ३ पं॰ ५ ह्स्ल्व्यूं जयिनी
वाग्देवताश्री॰ ३ यं॰ ४ झ्स्म्र्यूं सर्वेश्वरीवाग्देव
ताश्री॰ ३ शं॰ ६ क्ष्म्रीं कौलिनीवाग्देवताश्री
॰ एताः रहस्ययोगिन्यः सर्वरोगहरेचक्रे
समुद्राः ससिद्धयः सायुधाः सशक्तयः सवाह
नाः सपरिवाराः सर्वोपचारैः संपूजिताः संतु ३
तिसमष्ट्यार्चनेपुष्पांजलिनाकृत्वा इत्यादिव
शिन्याद्यष्टे ३ ह्रींश्रींसौः त्रिपुरसिद्धाचक्रेश्वरी

श्री० ह्स्क्ल्ह्रीं इतिखेचरीमुद्रांप्रदर्शयेत् इति
सप्तमावरणम् महाज्ञाख्यवाहिन्यः पश्चिमादि
दिक्षुप्रदक्षिण्येन २ द्रांद्रींक्लींब्लूंसः सर्वजंभने
भ्योबाणेभ्योनमः २ धंसर्वसंमोहनायधनुषेन
मः २ ह्रींसर्ववशीकरणायपाशायनमः २
क्रोंसर्वस्तंभनायांकुशायनमः इत्यायुधार्चनं
विधाय नादप्रकृतिकगुणत्रयप्रधानशक्तिरू
पेवेदोत्रयात्मके बंधूकपुष्पवपुकिरणेत्रिको
णेषुविंदौचक्रमेण २ क ५ कामेश्वरी० ३ ह ६
वज्रेश्वरीश्री० ३ स ० ४ भगमालिनीश्री० ३
समस्तमूलं महात्रिपुरसुंदरीश्री० एताश्चति
रहस्ययोगिन्यः सर्वसिद्धिप्रदेचक्रे समुद्राः स
सिद्धयःसायुधाः सशक्तयःसवाहनाःसपरिवा
राःसर्वोपचारैःसंपूजिताः संतु इतिसमष्ट्या
र्चनंपुष्पांजलिनाकृत्वा इत्यादिकामेश्वर्याःपु
रतः २ स्हौःह्स्क्लींस्हौःत्रिपुरांबाचक्रेश्वरीश्री० इ
तिसंपूज्य स्हौः इतिवीजमुद्रांप्रदर्शयेत् इत्यष्ट
मावरणम् विंदुभिन्नपरब्रह्मात्मके विंदुच
क्रे २ मूलं श्रीमहाललिताश्री० इतिदेवींसंपू
ज्य एषापरापररहस्ययोगिनीसर्वानंदमयेच
क्रे समुद्राःससिद्धयःसायुधासशक्तिःसवा
हनासपरिवारा सर्वोपचारैःसंपूजिताःस्तु
त्यभ्यर्च्यपुनः २ मूलं श्रीललितामहाचक्रेश्व
रीश्रीपादु० इत्यभिपूज्य ऐं इतियोनिमुद्रां

प्रदर्शयेत् इतिनवमावरणम् अथपुनरपि
श्रीदेव्यै पूर्ववद्धूपदीपौकल्पयित्वा संक्षोभि
ण्यादिमुद्राः सबीजाः प्रदर्श्य मूलेनत्रिवारंसत
र्प्य महानैवेद्यंसमर्पयेत् यथा श्रीदेव्याग्रेच
तुरस्रं मंडलंसमात्मार्घोदकेनविधाय त
त्राधारोपरिस्थापितस्वर्णादियथासंभवपा
त्रभरितं यथासंभवंनैवेद्यंपरिविष्यत्रिमूलेनशो
ध्य वमितिधेनुमुद्रयामृतीकृत्य ३ मूलेनसप्त
वारमभिमंत्र्य पूर्ववदापोशानंकृत्वा हेमपात्र
गतंदेवी परमान्नंसुसंस्कृतम् पंचधाषड्रसो
पेतंगृहाणपरमेश्वरी इतिप्रार्थ्य पूर्ववन्निवे
द्य तत्तन्मुद्राविधानपूर्वं पंचप्राणाहुतीःकल्प
येत् यथा ३ ऐंप्राणायस्वाहा ३ क्लीं अपानाय
स्वाहा० ३ सौः व्यानायस्वाहा० ३ सौः उदानायस्वा
हा० ३ ऐंक्लींसौः समानाय० ततः ३ विद्याप्रथ
मखंडेनमः विद्यातत्वव्यापिनीश्रीमहा० तृ
प्यतु विद्याद्वितीयखंडेनमः शिवतत्वव्यापि
नीश्रीमहा० तृप्यतु समस्तविद्यानमः सर्वत
त्वव्यापिनीश्रीमहात्रिपुरसुंदरीतृप्यतु इतिनि
मीलितनयनः क्षणमवस्थाय श्रीदेवींभुक्तव
तींविभाव्य पूर्ववदुपचारमंत्रैः पानीयोत्तरा
पोशानकरप्रक्षालनगंडूषपाद्यानिकल्पयित्वा
भोजननपात्रं नैऋत्यां निरस्यास्त्रेणस्थलंसंशोध्य
ततः पुनः प्राग्वदाचमनीयं कर्पूरवीटिकांदत्त्वा

श्रं १५

19

णकर्पूरनीराजनं दत्वा स्ववर्णादिभाजनलि
खितं कुंकुमेरवोत्मकाष्टदलानि कमलक
र्णिकास्थापितमणिमयचषकपूरितप्रण्यमं
प्रज्वाल्य पुष्पाक्षतैरभ्यर्च्य उपचारमंत्रपूर्व
त्रिर्नवधावत्तुर्दशधावा परिभ्राम्यस्थापयेत्
उपचारमंत्रस्तु श्रंतस्तेजो वहीस्तेजएकीकृत्सा
मितप्रभम् त्रिधादीपपरिभ्राम्य कुलदीपं निवे
दये अथांजलौ पुष्पाण्यादाय शिवेशिवस्वशी
तलामृततरंगगंधोल्लसन्नवावरणदेवते नवा
नवामृतस्पंदिनी गुरुक्रमपुरस्कृते गुणशरीर
नित्योज्वले षडंगपरिवारिते कलित पुष्प
पांजलिः इमं क्रा ई श्रीं० पुष्पांजलिं क० इति
समर्पयेत् अथविघ्ननामुत्वेविंयुहृदयेन कूर्चो
सपरार्ईनयोनिरिति कामकलात्मिकां ध्यात्वा
देवीशक्तिवीजं हृदयत्वेन भावये ततो देव्याद
क्षिणभागे सामान्योदकेन त्रिकोणवृत्तचतुर
स्रात्मकं मंडलं परिकल्प्य ऐं व्यापकमंडला
यनम इति गंधादिभिरभ्यर्च्य भक्ष्यपूरितो
दकं सदीपादित्रयं पात्रे तत्र विन्यस्य ॐ ह्रीं सर्व
विघ्नकृद्भ्यः सर्वभूतेभ्यो हूं स्वाहेति मंत्रं त्रिः प
ठित्वा दक्षकरार्पितं वामकरतत्त्वमुद्रास्पृष्टस
लिलं वस्तु परिदत्वा वामपार्ष्णिघातकराग्रस्फो
टौ कुर्वाणः सम्यक् संचितवक्त्रो बाणमुद्रया बलिभू
तेभ्यो हितं विभाव्य प्रणमेत् इति बलिदानविधिः

अथ प्रदक्षिणनमस्कारानंतरं जपप्रकरणे व
क्ष्यमाणेन विधिना जपं निर्वर्त्य स्तुवीत ॐ गणे
शग्रहनक्षत्रयोगिनीराशिरूपिणीं देवीमंत्रम
यीं नौमि मातृकापीठरूपिणीम् प्रणमामि मह
देवीं मातृकां परमेश्वरीम् कलहह्लोहलोह्लोल
कलनाशमकारिणीम् २ यदक्षरैकमात्रेऽपि संसि
द्धे स्पर्धते नरः रवितार्क्ष्येन्दुकंदर्पशंकरानलवि
ष्णुभिः ३ यदक्षरशशिज्योत्स्नामंडितं भुवनत्रयम्
वंदे सर्वेश्वरीं देवीं महाश्रीसिद्धमातृकाम् ४ यद
क्षरमहासूत्रप्रोतमेतज्जगत्त्रयम् ब्रह्माण्डादिक
टाहान्तं तां वंदे सिद्धमातृकाम् ५ यदेकादशमाधा
रं बीजं कोणत्रयोद्भवम् ब्रह्माण्डादिकटाहान्तं ज
गदद्यापि दृश्यते ६ अकचादिटतोन्नद्धपयशा
क्षरवर्गिणीम् ज्येष्ठांगबाहुहृत्पृष्ठकटिपादनि
वासिनीम् ७ तामीकाराक्षरोद्धारां सारात्सारां परा
त्पराम् प्रणमामि महादेवीं परमानंदरूपिणीम् ८
अद्यापि यस्या जानंति न मनागपि देवताः केयं क
स्मात्क्व केनेति स्वरूपारूपभावनाम् ९ वंदे ता
महमक्षय्यक्षकाराक्षररूपिणीम् देवीं कुलक्ष
लोल्लोलप्रोल्लसंतीं परां शिवाम् १० वर्गानुक्रम
रूपेण यस्या मात्राष्टकं स्थितम् वंदे तामष्टवर्गो
त्थमहासिद्ध्यष्टकेश्वरीम् ११ कामपूर्णजकारा
ख्यश्रीपीठान्तर्निवासिनीम् चतुराज्ञाकोशभूतां नौ
मि श्रीत्रिपुरामहम् १२ इति द्वादशभिः श्लोकैः स्तव

श्रु. २.
20

नं सर्वसिद्धिदम् देव्यास्त्वत्वेङ्हणाणां स्तवनं त
वतद्यत: १३ भूमौ स्खलितपादानां भूमिरेवाव
लंबनम् त्वयि जातपराधानां त्वमेव शरणं शिवे
१४ जपो जल्प: शिल्पं सकलमपि मुद्राविरचना ग
ति: प्रादक्षिण्यक्रमणमशनाद्याहुतिविधि: प्रणा
म: संवेश: सुखमखिलमात्मार्पणधिया सप
र्यापर्यायस्तव भवतु यन्मे विलसितम् १५ पिता
माता भ्राता गुरुरथ सुहृद्बांधवजन प्रभुस्तीर्थं
कर्माविकलमिह चामुत्र च हिते विषुडावि
द्यावापदमपि च तत्साम्यम शिवे त्वमेव श्रीमा
त: स्वपिसि गतशोक: सुखमन: २ दृशा द्राघीय
स्या दरदलितनीलोत्पलरुचा दवीयांसं दीनं स्न
पय कृपया मामपि शिवे अनेनायं धन्यो भव
ति न च ते हानिरियता वने वा हर्म्ये वा समक
रनिपातो हिमकर: ३ हे सद्रूपिणि हे चिदचि
द्रूपे हे कामराजप्रिये हे भंडासुरहंत्रि हे भु
तनिधे हे नंगसंजीवनी हे विश्वप्रसवित्रि हे स
करुणे हे दीनरत्नामणे हे श्रीमल्ललितांबे हे प
रशिवे मां पाहि डिंभं निजम् ४ नमो हेमाद्रिस्थे
शिवसति नम: श्रीपुरगते नम: पद्माटव्यां क्र
नकिनि नमो रत्नागृहगे नम: श्रीचक्रस्थे खि
लमयि नमो विंदुनिलये नम: कामेशांकस्थि
ति मतिनमस्ते ललिते ५ जयजय जगदंब भ
क्त वरदे जयजय प्रसादकृपावशांतरंगे जयजय

निखिलार्थदानशौंडे जयजयह्लाललितांठचित्स्व
रूपोह्वे ६ षडंगदेवतानित्यादिव्यौघत्रयीगुरून्
नमस्यायुधदेवीश्च शक्तिश्चावरणस्थिता ७ पद्मा
वत्यंबिकाधीनवामांकायशिवात्मने भास्करानंद
नाथाय मम श्रीगुरवे नमः ८ सुंदर्यं वाममस्लेषस्
स्थिताय सदा नमः प्रकाशानंदनाथाय गुरवे परमा
त्मने ९ मिश्रांबानयनोल्लासविश्रांतमनसे नमः
श्रानंदानंदनाथाय गुरवे परमेष्ठिने १० इदं गुरुस्तो
त्रं स्वस्वगुरुरूपलक्षणं बालभावानुसारेण भूयो
मम विचेष्टितम् ११ मातृवात्सल्यसदृशं तया दे
विधीयताम् एवमादिभिरन्याभिश्च यथावकाशं
स्तुतिभिरखिललोकमातरमभिष्टूय शक्तिपूजये
यथा प्राङ् निमंत्रितां षोडशाब्दपरतः आत्रिंशाब्द
विदेशीयां स्ववासिनीमध्ये तां गौरीरूपिणीं लक्ष
णपादीदितां भक्तामन्यैरप्युक्तगुणैरलंकृतां कुला
कुलाष्टकपरिगणितां अलाभे चान्यवर्णान्तर्गतां पर
कीयां शक्तिं स्वीयां वा समानीय प्रक्षालितपादामासने
समुपवेशयेत् सा वेददीक्षिता तदेव शोधनविधिः २
ऐं ह्लीं सौः त्रिपुरायै नमः इमां शक्तिं पवित्रीकुरु मम
शक्तिं कुरु स्वाहा इत्यभिषेकमंत्रपूर्वं सामान्यसलि
लेन शक्तिं त्रिः प्रोक्ष्य ॐ शांतिरस्तु शिवं चास्तु प्रणश्य
त्वशुभं च यत् यत एवागतं पापं तत्रैव प्रतिगच्छतु
इत्युच्चार्य तस्याः कर्णे ह्लीं बीजं जपेत् इति अथ तां देवी
रूपां विभाव्य ३ ऐं ह्लीं सौः शक्त्यै अमुकं कल्पयामि

अ॰
२१
21

नमः इति मंत्रेण हरिद्राकुंकुमचंदनपटवासपुष्प
धूपदीपनैवेद्यतांबूलादि दद्यात् सति विभवे वस
नाभरणानीनि च ततो मूलेन वक्ष्यमाणेन समष्टिमं
त्रेण चक्रमेण श्रीदेव्यै आवरणदेवताभ्यश्च दत्त
पुष्पांजल्यास्तस्याः करे सोपादिमसख्यमसुद्रं बु
कलमितं तीरपात्रमर्पयेत् साप्युत्थाय तत्कपाल
मुद्रया तद्द्वितीय तृतीयं च दलकरेणादाय पात्रं द
क्षकरे निधाय तत्त्वमुद्रया तद्द्वितीयशाकलगृहीत
तीरबिंदुभिः शिरसि गुरुपादुकामनुना त्रिरिष्टु
हृदि च श्रीदेवीं त्रिः संतर्प्य मूलेन पुनः पात्रं वाम
करे कृत्वोत्थाय होष्यामीति श्रीगुरुं जपेष्टान्यतरां तुसं
प्रार्थ्य जुहुधीति तत्प्रत्युक्तादक्षकरव्यवदानेन मू
लाने सर्वतत्त्वं शोधयामि नमः स्वाहेति मंत्रेण सर्वत
त्त्वशोधयेत् पतत्स्थापिच्छिकानि विना मंत्रपात्रांतरा
णपि अथ पुनः कर्त्ता पूर्ववत्पात्रमादाय १ अलिपा
त्रमिदं तुभ्यं दीयते पिशितान्वितम् स्वीकृत्य स्व भगे
देवी यशो देहि रिपून्दहेति मंत्रेण शक्त्यै समर्पयेत्
सापि सावशेषं तत् स्वीकृत्य वत्स तुभ्यमया दत्तं पी
तशेषं कुलामृतम् त्वमस्य त्रूत्कं सहरिष्यामि तवाभीष्टं
ददाम्यहम् इति मंत्रेण प्रतिदद्यात् साधकस्तदंगी
कृत्य शक्तिचतुष्टयेन भोजयित्वा समर्पितताम्बूलो
यथा विधिना पंचमेन संतोष्य विसृजेत् इति सुवा
सिनीपूजा अथ संनिहिते गुरौ तं मंत्रेणाभिपूज्य पा
त्रं समर्प्य समाकृतेः शिष्टैः हंदात्मना वर्णितस्याम

यकैः साकं पाणीप्रतालं श्रीदेव्यै मूलेनोचोपचा
रमंत्रेण त्रिः पुष्पांजलिं समर्पयेत् ३ समस्तप्रक
टगुप्तगुप्ततरसंप्रदायकुलकौलनिगर्भरहस्या
तिरहस्यपरापरातिरहस्ययोगिनीश्रीगुरुपादुका
भ्यो नमः इति समष्टिमंत्रेणावरणदेवतानामेकंपु
ष्पांजलिं दत्वा पूर्ववत्पात्रं पुनः पुनरादाय चमनी
योक्तैर्मंत्रैस्तत्वानि शोधयेत् यथा क ५ आत्मतत्वं
शोधयामि नमः स्वाहा ह ६ विद्यातत्वं शोधयामि न
मः स्वाहा स ४ शिवतत्वं शो० शोडषुपासकस्य त्रयो
दशबीजपुटितैः प्रत्येककूटैः तत्वत्रयशोधनं सर्व
मूलेन सर्वतत्वं शोधयामीति विशेषः तत्र प्रथमपात्र
स्वीकार पवोत्थाने यथासंप्रदायसर्वपात्रस्वीकारेपि
द्रतिहविः प्रतिपत्तिः ततः सामान्योदकात्किंचिदादा
य साधु वासाधु वा कर्म यद्यदाचरितं मया तत्सर्वं कृ
पया देवी गृहाणाराधनं ममेति देवीवामहस्ते पूजां
समर्प्य शंखमुद्धृत्य देव्याः परितः त्रिः परिभ्राम्य तज्ज
ले हस्ते समादाय सामयिकानात्मानं च मूले प्रोक्ष्य ज्ञा
नतो ज्ञानतो वापि यन्मयाचरितं शिवे तव कृत्यमिति
ज्ञात्वा क्षमस्व परमेश्वरि इति क्षमाप्य सर्वासामावर
णदेवतानां श्रीदेव्यंगे विलयं विभाव्य खेचरीबधो
द्रास्य तेजोरूपेण परिणतां श्रीदेवीं पूर्ववद्धृदये
नीत्वा तत्र मूर्तिं यं च धोपर्यं पुनरात्माभिन्नसंविद्रू
पेण विभावयेत् इति विसर्जनम् ततः संपूजका
नां परिपालकानां यतेंद्रियाणां च तपोधनानाम्

अ॰
२२
22

देशाख्यराष्ट्रस्य कुलस्य राज्ञां करोतु शान्तिं भगवान्कुले
शः नंदतु साधककुलान्यणिमादिसिद्धाः शापाः प्र
तेनु समयं द्विषयोगिनीनाम् साशांभवी स्फुरतु
कापि मयाप्यवस्था यस्यां गुरोश्चरणपंकजमेव
लभ्यम् शिवाद्यवनिपर्यन्ते ब्रह्मादिलठसंयुतम्
कालाद्यग्निशिवान्तं च जगद्यज्ञेन तृप्यतु इति शा
न्तिश्लोकान्पठित्वा विशेषार्घ्यपात्रमामस्तकमुद्धृत्य
तन्नीरं पात्रान्तरेणादाय ओं ईं ज्वलति ज्योतिरहमस्मि
ज्योतिर्ज्वलति ब्रह्माहमस्मि योहमस्मि ब्रह्माहमस्मि
अहमस्मि ब्रह्माहमस्मि अहमेवाहं मां जुहोमि स्वा
हेति मन्त्रेणात्मकुण्डलिन्यां हुत्वा शेषं प्रियशिष्याय दे
यं तत्पात्रमन्यानि च हविः शेषप्रतिपत्तिपात्राणि च
प्रक्षाल्याधोप्रतान्य स्थापयेत् अथ यथाशक्ति ब्रा
ह्मणान् सुवासिनीश्च भोजयित्वा स्वयमपि भुञ्जी
तेति इति नित्यक्रमः अनवरतहृक्तसमसेसौरभ
सेवनसंपूर्णसकलकामस्य पुष्पान्तरसेवनेयं भ्र
मरस्य विटंबना महती इति स्तुता महादेवेशोमहं
दरतांडवम् देवत्वं संनिधो नत्वा भक्त्या परमेशा
भवे इतिश्री नित्योत्सवनिबंधे यौवनोल्लासो
क्तप्रकारेण सूत्रानुसारी श्रीललितापद्धतिः प
रिपूर्णतामगात् ॥